Vol. XVI No I

©
Government of Madras
1963

# BULLETIN OF THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY MADRAS

EDITED BY

A. A. RAMANATHAN, M.A., L.T.
*Curator, Government Oriental Manuscripts Library, Madras*

1963

*Price Rs. 2*

## RARE BOOKS FOR SALE

The following publications of the Government Oriental Manuscripts Library, Triplicane, Madras-5 will be sold for the amount noted against each which is only *half the original price* :—

| | | Rs. | nP. |
|---|---|---|---|
| 1. | Brahmasiddhi of Maṇḍanamiśra with the commentary of Śaṅkhapāṇi—an advanced work on Advaita Philosophy ... ... | 3 | 87 |
| 2. | Rāmānujacampū with commentary ... | 1 | 50 |
| 3. | Vyākaraṇa Mahābhāṣya of Patañjali with the commentary of Kaiyaṭa and the super-commentary of Annambhaṭṭa, Volume I ... | 10 | 37 |
| | Do. do. Volume II ... | 4 | 50 |
| 4. | Back volumes of the Multilingual Half-Yearly Bulletin containing in print rare manuscripts in Sanskrit, Marathi, Islamic and other South Indian Languages (each volume) ... | 2 | 00 |
| 5. | The Descriptive and Triennial Catalogues of the Manuscripts in the Library published on or before 1950 are also available for sale at half rate. | | |

Sales tax, packing and postage extra. The amount should be sent in *advance*.

Please apply to the Curator.

Vol. XVI

No. I

©
Government of Madras
1963

# BULLETIN OF THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY MADRAS

EDITED BY

A. A. RAMANATHAN, M.A., L.T.

*Curator, Government Oriental Manuscripts Library, Madras*

1963

*Price Rs. 2*

PRINTED AT
THE BHARATI VIJAYAM PRESS,
TRIPLICANE, MADRAS-5.

## Table of Contents


| | | Page |
|---|---|---|
| 1. | Śivajñānabodha with Vṛtti (Sanskrit) | 1 |
| 2. | Paḻaniyāṇḍavarkalittuṟai (Tamil) | 57 |
| 3. | Veṅkaṭēśapperumāḷ Tamiḻ Mālai (Tamil) | 73 |
| 4. | Sultānut Tawārikh (Persian) | 95 |

# ŚIVAJÑĀNABODHA, WITH VṚTTI OF SADĀŚIVA ŚIVĀCĀRYA

edited by

A. A. RAMANATHAN, M.A., L.T.,

and

T.H. VISWANATHAN.

Siddhānta Śaivism is a Philosophy that is expounded by the Vedas and Śivāgamas. Scholars are inclined to 'view that the Svetāśvatara Upaniṣad is the source of this Philosophy. S'ivāgamas or divine revelations as they are regarded by S'aivites, twenty eight in number, have four pādams each called Kriyā, Caryā, Yoga and jñānapādams. They deal elaborately with the S'aiva philosophy, the nature and definition of three padārthas viz. Pas'u, Pati and Pāsa, in their jñānapādams while they deal with other items like construction of images, conducting of festivals in temples etc., in the other three sections. In some cases jñānapādams contain some sūtras and stanzas which reveal briefly the essence of the S'aivaphilosophy.

S'ivajñānabodha, the present work, belongs to this category. This work, consiting of twelve stanzas which are also called sūtras on account of their brevity in their style, froms part of Rauravāgama. In this work important siddhāntas or viewpoints of Siddhānta Saivism have been put in a nutshell and hence this is, as it appears, also called siddhānta sūtra, under which title this has been described in the Catalogue of the Government Oriental Manuscripts Library, Madras. It is believed as stated in the commentary itself that these stanzas or sutras form the 73rd chapter of the Pās'avimocana paṭala of Rauravāgama though it is not found in the Rauravāgama that has been recently published by the French School of Indology, Pondicherry. Since the Rauravāgama published there is, as it appears, not a complete work, it may explain why this work is not found therein.

This is a standard work in siddhānta S'aiva Philosophy and Saivites used to have these sutras by heart in order to recite them

whenever they found time even while they were moving from place to place. This has been commented upon by many great scholars in S'aiva Philosophy like Śivāgrayogi, jñānaprakāś'a Śivāchārya, etc. Some of these commentarics are very brief, some elaborate and some take the middle course. The large number of commentaries on this work indicate the importance that is attached to this work. S'ivāgrayogi's commentary has been printed in Grantha script by S'āradāvilaṣ Press, Kumbakonam.

This is accompanied by a brief commentary of Sadās'iva Śivācārya disciple of Isvara S'ivācārya and the head of Maṇikaṇṭha Mutt. Except this nothing is known about the author. The simplicity of the style, the impressive nature of the commentary and the large number of passages quoted from authoritative works are the main considerations that prompted us to take it up for publication though it is available only in a single copy with a profusion of scribal errors.

The text and commentary published herein are based on a single paper manuscript written in Telugu script and preserved in the Government Oriental Manuscripts Library under D. No. 5556. The size of the volume is 20.6 x 16.5 centimeters. It is full of scribal errors and many of the works quoted herein are not yet printed. Hence the text has been corrected as far as possible with the material available here.

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

# ॥ सिद्धान्तसूत्रवृत्तिः ॥

शिवं परात्परं नित्यं चिद्घनानन्दमव्ययम् ।
पशूनां पाशहर्तारं पञ्चकृत्याधिकारिणम् ॥
विघ्नेशं स्कन्दमम्बां च विश्वेशं च गिरं गुरुम् ।
नत्वा सिद्धान्तसूत्राणां वृत्तिं वक्ष्ये शिवाज्ञया ॥

श्रीमन्मेरौ कैलासनामकशिखरे विराजमानं श्रीदक्षिणामूर्तिभगवन्तं श्रीनन्दिकेश्वरो नमस्कृत्य, स्वामिन् पुरा चर्याक्रियायोगपादास्त्वनुगृहीताः । पक्वात्मनां मुमोक्षाय ज्ञानपादमनुगृहाणेति पप्रच्छ । सोऽपि तेन प्रश्नेनानुमोदितः तत्तथैवेति प्रतिज्ञाय यथाश्रुतमुपादिशत् । तद्यथा—अथसृष्टेः पूर्वं निष्कलपरशिवात् नादादिपदत्वेनोद्गीर्णं संज्ञारूपात्मकं ज्ञानमन्त्रविग्रहवत्तया सकलकलात्मकः सदाशिवदेवो बुद्ध्वा पशूनां चतुर्विधपुरुषार्थसिद्ध्यर्थं त्रिपदार्थचतुष्पादप्रतिपादकं कामिकाद्यष्टाविंशत्यागमजालं पञ्चवक्त्रैर्निर्माय प्रणवादिभ्यो दशभ्यः शिवेभ्योऽनादिरुद्राद्यष्टादशभ्यो रुद्रेभ्यश्चोपदिष्टवान् । स तेषामुपदेशकाले उपश्रोत्रा रुरुसंज्ञकेन सङ्ग्रहरूपेण ज्ञानमार्गमुपदिशेति पृष्टस्सन् तथैवेत्यनुगृह्य सकलागमेषु सारं समुद्धृत्य शिवज्ञानबोधाख्यमनुष्टुप्छन्दोरूपं द्वादशसूत्रात्मकं शास्त्रं प्रणीय तस्मै समुपादिशत् । तत्सहितं सर्वागमजालं मघौघ- [महौघ] प्रकारेणानन्तेश्वरायोपदिष्टवान् । सोऽपि यथाश्रुतं मह्यमुपादिशत् । अहमपि तद्रौरवागमान्तस्स्थपाशविमोचनपटले पठितानि शिवज्ञानबोधसिद्धान्तसूत्राणि तदर्थांश्च तुभ्यमुपदिशामि । त्वमपि पक्वात्मनां त्वस्यार्थानुपदिशेत्युपदिष्टवान् ।

अथेदानीं निगमागमपारावारपारीणवैदिकशैवसिद्धान्तस्थापनाचार्यवामदेवऋषिसम्प्रदायप्रवर्तकमणिकर्णिकामठनिवासप्रसिद्धनैष्ठिकवर्यविश्वेश्वरशिवाचार्यप्रधानशिष्यशैवसंन्यासनिष्ठानिष्णातसदाशिवशिवाचार्ययोगी तानि सिद्धान्तसूत्राणि व्याकरोति ।

अस्मिन् शिवज्ञानबोधशास्त्रे प्रथमद्वितीयसूत्राभ्यां कर्तुः प्रमाणलक्षणे संहारो [ त्पत्तिक्रमे मायाकर्मणोः प्रमाणलक्षणे च तृतीयतुरीयसूत्राभ्यां पशु-पशुत्वयोः प्रमाणलक्षणमीश्वरतिरोधान ] कृत्यं च, पञ्चमसूत्रेण पशोरन्तर्यामित्वेन पशुपतेः पालकत्वविधानं च, षष्ठसप्तमसूत्राभ्यां सदसन्निरूपणं च, अष्टमनवम-सूत्राभ्यां शिवानुग्रहपूर्वं श्रवणमनननिदिध्यासनसाक्षात्कारफलितमोक्षक्रमं च, दशमसूत्रेण प्रपत्त्या पाशवासनाक्षयं चागामिकर्मानवाप्तिं च, एकादशद्वादश-सूत्राभ्यां अन्तरङ्गबाह्यभक्तिप्रतिपादकयोगक्रियाचर्याक्रमं च समाहृत्य त्रिपदार्थाः चतुष्पादाः प्रतिपादिताः ।

अस्य शास्त्रस्य पतिपशुपाशविवेको विषयः । पाशपरित्यागेनाखण्डाकार-सच्चिदानन्दाद्वयपरिपूर्णशिवसायुज्यरूपमुक्तिः प्रयोजनम् । शक्तिपातवन्तोऽधि-कारिणः । आत्मनां शिवज्ञानेन शिवानन्यानुभवबोधः सम्बन्धः ॥

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदं तं भक्तानामेकदन्तमुपास्महे ॥

अथानुमानपुरस्सरं पठितसूत्रस्य व्याख्यामादावारभते[1] । शब्दार्थात्म-कप्रपञ्चस्य स्वयंभूत्वस्वभानत्वाभ्यां न कर्तृपेक्षेति वादिनो निराकरणपूर्वकमनु-मानेन जगत्कर्तारं शिवं साधयति :—

**सू—स्त्रीपुंनपुंसकादित्वात् जगतः कार्यदर्शनात् ।**
**अस्ति कर्ता स हृत्वैतत् सृजत्यस्मात् प्रभुर्हरः ॥ १ ॥ इति ॥**

जगतः कर्तास्ति स्त्रीपुंनपुंसकादित्वात्, कार्यदर्शनात् स एतद् हृत्वा सृजति । अस्मात् प्रभुः हरः इति योजना । ननु

[2]प्रमाणव्यतिरिक्तत्वादप्रमेय इति स्मृतम् ।
अनिर्देश्यमलक्ष्यत्वात् [3]अवाङ्मनसगोचरम् ॥

इत्यादिप्रमाणागोचरत्वप्रतिपादकागमवचनबाहुल्यादनुमानेन परतत्त्वं साध्यत इत्युक्तिः विरुद्धेति चेत्—सत्यम् । उपाधिरहिते निर्विकल्पकज्ञान-

---

१. मातृका—आरभ्यते ।
२. मातृका—पुराण ।
३. मातृका—वाङ्मनातीतगोचरम् ।

स्वरूपेऽनर्वाचीनपदे परतत्त्वे तथा भवतु । महत्त्वमस्माभिरनुमानेन साध्यत इत्युक्तिः बैन्दवादिसहितसविकल्पकसार्वज्ञादिषाड्गुण्यविशिष्टार्वाचीनलय-भोगाधिकारधर्मलक्षितशक्ताभिधानकपदस्यैव । तदुक्तं पुष्पदन्तस्तवे—

अतीतः पन्थानं तव च महिमा वाङ्मनसयो-
रतद्व्यावृत्त्या यं चकितमभिधत्ते श्रुतिरपि ।
स कस्य स्तोतव्यं कतिविधगुणः कस्य विषयः
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥

पौष्करे—

लयभोगाधिकारात्मव्यापारत्रयलक्षितः ।
स्वभावादच्युतः शक्तः स पतिः परिपठ्यते ॥

पदार्थः पतिसंज्ञितः इत्यतो न विरोधः । जगतः कर्तास्तीति प्रतिज्ञा । गच्छति नश्यतीति व्युत्पत्त्या जगच्छब्दो निष्पन्नः । तज्जन्मादिकं कर्तृसा-पेक्षम् । तथा च मृगेन्द्रेः—

जगज्जन्मस्थितिध्वंसतिरोभावविमुक्तयः ।
कृत्यं सकारकफलं ज्ञेयमस्यैतदेव हि ॥ इति ॥

अत्र प्रथमं शब्दप्रपञ्चसाधकहेतुमाह—**स्त्रीपुंनपुंसकादित्वादिति** । वर्णानां स्त्रीपुंनपुंसकलिङ्गाव्ययादिभेददर्शनात् जडत्वे सत्यनेकत्वात् गुणत्वाच्च प्रज्ञादिषाड्गुण्यविशिष्टेच्छाप्रयत्नादिशक्तिमत्कर्तृकत्वम् । तथा च वातूले—

स्त्रीरूपाश्चैव पुंरूपास्तथानुभयरूपकाः ।
सर्वे च देवतारूपाः प्रत्येकं वर्णरूपकाः ॥

अजिते—

आसीत्पूर्वं हि सर्गादौ ब्रह्मरूपात् पराच्छिवात् ।
शब्दस्ततोऽक्षरस्तस्माच्छब्दराशिरनुत्तमः ॥

पौष्करे—

तेषामेका परा योनिः यत्तेजः प[पा]रमेश्वरम् ।
निमित्तमीश्वरस्तेषामुपादानं स बिन्दुराट् ॥
स्वकर्मसहकारी स्यात् कार्यं तस्मात्सहेतुकम् ।
उपादानमतो बिन्दुर्यस्माद्वर्णा न तं विना ॥

बहुधा संस्थिता वर्णाः कृतकाः चेतना यतः ।
वर्णाश्च स्वरसंयोगात् पदं तैर्वाक्यमिष्यते ॥
तस्मादर्थप्रतीतिः स्यात् व्यवहारनिबन्धना । इति ।

अर्थप्रपञ्चसाधकहेतुमाह—**कार्यदर्शनादिति** । तनुकरणभुवनभोग्यवस्तूनां कार्यत्वेन दर्शनात् उत्पत्तिमत्त्वात् कर्तास्तीत्यर्थः ।

पराख्ये— मूर्ता सावयवा ये ता नानारूपपरिच्छिदः ।

मृगेन्द्रे— अथानादिमलापेतः सर्ववित् सर्वकृच्छिवः ॥

न्यायशास्त्रे च—

नमामि परमात्मानं स्वतस्सर्वार्थवेदिनम् ।
विद्यानामादिवक्तारं निमित्तं जगतामपि ॥

अस्योदाहरणं पौष्करे —

विवादाध्यसितं विश्वं विश्ववित्कर्तृपूर्वकम् ।
कार्यत्वादावयोस्सिद्धं कार्यं कुम्भादिकं यथा ॥ इति ॥
इह धर्मेण साध्यते क्वचित्कार्येण कारणम् ।
कारणेन क्वचित्कार्यं क्वचिदाम्नायदर्शनात् ॥

इति मतङ्गवचनात् आगमेन जगतः सकर्तृकत्वसिद्धिः । अनुमानं च विचित्ररूपं जगत् ज्ञानक्रियाशक्तिसाध्यं कार्यत्वात् शि[जी]वज्ञानक्रियासाध्यरथगोपुरप्रासादादिसतीति [वदिति] ज्ञानक्रियाशक्तिसिद्धौ, तद्धर्मी महेश्वरः कर्तेत्यनुमीयते । ननु अनुमानस्य प्रत्यक्षोपशपि[जीवि]त्वात् रसवत्वादौ धूमाग्निदृष्टौ भूधरे धूमदर्शनादग्न्यनुमितिवत्, एकत्रैकदा घटादिकं तत्कर्तारं तत्क्रियां च दृष्ट्वान्यत्रापि घटदर्शनात् कुलालकर्तृकत्वानुमितिवच्च, एकत्र प्रपञ्चक्रियारूपधर्मं तत्कर्तारं दृष्ट्वा खलु प्रपञ्चकर्तास्तीत्यनुमेयम् । तद्वत् कुत्राप्यदृष्टत्वात् इदमीश्वरसाधकानुमानमसिद्धमिति चेत्—तन्न । अनुमानमपि विशिष्टशौ[दृ]ष्टसाधन-सामान्यदृष्टसाधनभेदेन द्विविधम् । तयोर्मध्ये धूमादग्न्यनुमानं, घटात् कुलालानुमानं चेत्यादिविशिष्ट[दृष्ट]साधनम् । पिशाचग्रस्तहि न [स्तान् हि] दृष्ट्वा तदाविष्टग्रहादर्शनेऽपि तच्चेष्टया ग्रहानुमानं सामान्यदृष्टसाधनम् । तद्वत् सामान्यदृष्टसाधनधर्मधर्म्यनुमानेनेश्वरसाधकानुमानं सिद्धम् । तथा हि किरणे :—

दृष्टं सामान्यतो दृष्टमिति तत्साधनं द्विधा ।
तत्राद्यमक्षयोग्यस्य पदार्थस्यानुमापकम् ॥
अन्यत् स्वतोऽप्यदृष्टस्य पदार्थस्यानुमापकम् ।
तथैव पशवः केचित् ग्रहग्रस्ता विकुर्वते ॥
विकारास्तत्र दृश्यन्ते ग्रहः क्वापि न दृश्यते ॥ इति ॥

अथ मायाकर्मणोरचेतनत्वात् कालस्य जडत्वे सत्यनेकतया कार्यत्वात् जीवानामाणवमलरुद्धक्रियाशक्तिमत्वात् हिरण्यगर्भनारायणकालरुद्राणां सकलरूपमहेश्वराङ्गोद्भूतत्वेन गुणत्रयाधिष्ठिताशुद्धाध्वकृत्यस्यैव कर्तृत्वात् शिव एक एव शब्दार्थप्रपञ्चयोरादिकर्ता ।

ननु ब्रह्मा जगत्कर्ता, नारायणो जगत्कर्ता, रुद्रो जगत्कर्तेति श्रुतिचोदितत्वात् अत्र कथं तद्व्युदासेन शिवस्यैव कर्तृत्वमुच्यते । सत्यम् । श्रुतौ कलशाक्षमालाशङ्खचक्रशूलडमरुकादिचिह्नानामनुक्तत्वात् ब्रह्मादीनां[दिभ्योऽ]भिन्नः निष्कलः परशिवः योगेन व्यपदिश्यते । नोचेदन्योन्यविरोधात् कृत्यमेव न सङ्गच्छेत । किञ्च [1]एको रुद्रो न द्वितीयाय तस्थे इत्यादिश्रुतिविरोधश्च । तस्माद्यौगिकब्रह्मविष्णुरुद्रात्मकभक्तेभ्यो लीलानित्यविभूत्योः प्रदायक ईश्वराभिधायकः शिव एव आदिकर्ता सकलरूपधृत् । ब्रह्मविष्णुरुद्रमहेश्वरादयस्त्ववान्तरकर्तारः । तदुक्तं पराख्ये—

एको हि नामगैर्भेदैः स्थितः स परमेश्वरः ।
बृहत्वात् बृंहणत्वाच्च ब्रह्मैव शिवयोगतः ॥
विष्णुः प्रभवशीलत्वात् प्रभवो जगतां प्रभुः ।
रुजं द्रावयते यस्मात् तेन रुद्रो रुजाक्षयात् ॥

पौष्करे च —

तथा प्रथमसृष्टेस्तु समस्तोपाधिवर्जितः ।
कर्ता महेशोऽवशिष्टः प्रवृत्ताशेषशक्तिकः ॥ इति ॥

स उक्तधर्मधर्म्यनुमानेन सिद्धः कर्ता । **एतत् हृत्वा सृजतीति ।** वर्तमानप्रपञ्चमुपसंहृत्य हर एक एवावशिष्टतया स्थित्वा पुनः प्राग्वत् सृष्ट्यादिकृत्यं करोति । तदुक्तं मृगेन्द्रे—

---

1. मातृका—रुद्र एक एव द्वितीयोऽन्ये ।

भोगसाधनमाश्रित्य कृत्वा कारणसंश्रयम् ।
तच्च सात्मकमाक्रम्य विश्रमायावतिष्ठते ॥

हर एक एवावशिष्टः[इत्यत्र]सममतिवचनं देवीकालोत्तरे :—

अहमेको न [मे कश्चित्] नाहमन्यस्य कस्यचित् ।
न तं पश्यामि यस्याहं तन्न पश्यामि यो मम ॥ इति ॥

पुनरपि मृगेन्द्रे—

भविनां भवखिन्नानां सर्वभूतहिते रतः ।
स्वापावसानमासाद्य पुनः प्राग्वत् प्रवर्तते ॥ इति ॥

ननु जीवानां जननमरणयातायातश्रान्तिविश्रान्त्यर्थमुपसंहारोऽस्तु । पुनः प्रपञ्चकरणं किमर्थमित्याशङ्कायां उत्तरवचनं किरणे—

भुक्त्यर्थं स्वपशुर्बद्धो नान्यथा सास्य जायते ।
यावच्छरीरसंश्लेषः न सञ्जातो न भोगभाक् ॥
मायेयं तत्पुनस्तस्य तथा भावान्न मुक्तिभाक् ।
तेन तेनास्वतन्त्रत्वात् मलिनो मलिनीकृतः ॥
यदा वस्त्रं सदोषत्वात् मलान्येन विशुध्यति । इति ॥

**अस्मात् प्रभुर्हर इति** । उक्तरीत्या परिशिष्टो जगत्स्वामी अयमेव पुनः सृष्ट्यादिकर्ता । एवं पूर्वोक्तधर्मधर्म्यनुमानेन सिद्धः पतिः तटस्थः । अस्य लक्षणमुत्तरत्र वक्ष्यामः । अस्य पत्युः परस्य परमात्मपरब्रह्मरूपपरशिवस्य लाक्षणिकवचनानि देवीकालोत्तरे—

निरञ्जनं निष्प्रतिमं निरीहमस्पृश्यमग्राह्यमचिन्त्यरूपम् ।

अचिन्त्यविश्वसादाख्ये—

परमं शाश्वतं सत्यज्ञानानन्तसुखात्मकम् ।
वाच्यवाचकराहित्यमवाङ्मनसगोचरम् ॥

वातूले—

शिवं परात्परं सूक्ष्मं नित्यं सर्वगमव्ययम् ।
अचिन्तितमनौपम्यमप्रमेयमनामयम् ॥ इति ॥

एतत्परशिवान्तर्भूतपञ्चशक्तीनां पुनः प्रपञ्चोत्पत्तिनिमित्तमाविर्भावः। यथा वातूले—

तच्छिवे तु परा शक्तिः सहस्रांशात्तु जायते।
तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः॥

तच्छक्तेस्तु सहस्रांशादिच्छाशक्तिसमुद्भवः।
तस्याश्शक्तेस्सहस्रांशाज्ज्ञानशक्तिसमुद्भवः॥

तस्याश्शक्तेस्सहस्रांशात्क्रियाशक्तिसमुद्भवः।
बिन्दुरूपं परा शक्तिः नादः स्यादादिरिष्यते॥

बीजमिच्छेति विज्ञेयं शब्दो ज्ञानमिहोच्यते।
वाग्भव[बा] स्यात्क्रियाशक्तिः॥ इति॥

एवं पञ्चशक्त्याविर्भावस्याभिन्ननिमित्तोपादानकारणात्मकं कर्ता शुद्धाशुद्धप्रपञ्चकृत्ये शक्तोद्युक्तप्रवृत्तभेदैः त्रिविधो भवति। तथा च मृगेन्द्रे—

शक्तोद्युक्तप्रवृ[त्तिभ्यः] कर्ता त्रिविध इष्यते।
शक्तेः प्रवृत्तिभेदेन भेदस्तस्योपचारतः॥ इति॥

अथैतेषु प्रथमं शक्तसंज्ञकपतेः स्थानलक्षणवचनानि—

पौष्करे—

उपसंहृतकार्यात्मा यदा बिन्दुर्व्यवस्थितः।
तदा लयाह्वयं तत्त्वं शिवतत्त्वं तदेव हि॥

विद्यातत्त्ववदेवेदं बिन्दुतत्त्वादिलक्षणम्।
किन्तु स्वभूक्रियाशक्तिकरणात्मकं प्रियम्॥ ?

व्यापकं नित्यमचलं सर्वतो[भद्र]मीश्वरम्।
तस्मिन् विशिष्टचिन्मात्रः व्यापकत्वादिधर्मवान्॥

अन्योन्यतश्च तच्छक्तेः समवायः स्थितः शिवः।
शक्तोऽयं शक्तयो यस्मादुद्योगादिक्रियाः च्युताः।
शिव एवावतिष्ठन्ते निष्कलश्च स एव हि॥

निरपेक्ष[त्व]सर्वज्ञत्वादि षाड्गुण्यपरिपूर्णः [भूषितः]॥

तथा च सर्वज्ञानोत्तरे—

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च निरामयात्मा विशुद्धदेहः स शिवत्वमेति ॥

अथ तस्य समवायलक्षणवचनानि सर्वज्ञानोत्तरे :—

निष्कलस्था परा शक्तिरचला सर्वतोमुखी ।
सुसूक्ष्मा निर्मला नित्यानन्दा निर्वाणदा परा ॥
सा बिन्दु[र्भा]ति तत्त्वेषु सर्वतत्त्वेषु चैव हि ।
तया धृतं जगत्सर्वमेकयानेकरूपया ॥

एताभुक्[दृक्]शक्तिप्रपञ्चकर्ता। ननु लोके ते भ[देह]वतामेव क्रियाकर्तृत्वदर्शनात् ईश्वरस्य तदभावात् कृत्यं कथं सम्भवतीत्याशङ्क्य परिहारवचनानि पौष्करे—

सदेहस्यापि [स्यैव] कर्तृत्वं सर्वत्रापि यदीष्यते ।
तद्देहस्यापि कार्यत्वात् व्याप्तं कर्त्रन्तरेण तत् ॥
तस्य देहादयोऽप्येवमित्यवस्था न कुत्रचित् ।
यथा कालो ह्यमूर्तोऽपि दृश्यते फलसाधकः ॥
एवं शिवो ह्यमूर्तोऽपि कुरुते कार्यमिच्छया ।
अदेहस्यापि कर्तृत्वं स्वदेहप्रेरणे यथा ॥

मृगेन्द्रे—

साधारे यः परार्थेऽस्मिन् निराधारेऽपि कृत्यकृत् ।
अन्तरिक्षे निराधारो दृष्टश्शाखादिकम्पकृत् ॥ इति ॥

भवतु तथा । शिवस्य पूर्वं निर्विकारत्वं प्रतिपादितम् । इदानीमन्योन्यविरुद्धपञ्चकृत्यकर्तृत्वे सुतरां विकारित्वप्रसङ्गश्च इत्याशङ्कायाः परिहारवचनानि पौष्करे—

कर्तृत्वं द्विविधं विप्राः सङ्कल्पात्करणादपि ।
न हि सङ्कल्पमात्रेण कुलालैः क्रियते घटः ॥
शिवस्सङ्कल्पमात्रेण बिन्दुक्षोभकरस्सदा ।
न व्यापारविशेषेण येनायं विकृतो भवेत् ॥

समस्तोपाधिशून्यत्वात् निर्मलत्वाच्च हे द्विजाः ।
य एवोपाधिमन्तस्ते विकृताः कार्यजन्मनि ॥
ततश्च नोऽविकारत्वं कर्तृत्वेन विरुध्यते ।
समस्तोपाधिशून्यत्वे कर्तृत्वं तस्य नेष्यते ॥
कर्तृत्वप्रतिबन्धत्वाद्दीपादेस्तद्वियोगतः ।
भवेत् प्रत्युत कर्तृत्वं प्राचुर्याय मुनीश्वराः ॥
यथार्को दिनचेष्टानां सन्निधेरुपकारकः ।
तथा सन्निधिमात्रेण विदधात्यखिलं शिवः ॥ इति ॥

अथ सृष्टिक्रम—कर्ता एवमेकोऽपि शक्तिद्वारानेको भूत्वा शुद्धाशुद्धमायाविशिष्टतयाभिन्ननिमित्तोपादानः सन् प्रपञ्चोत्पत्त्यादिकं करोति । तथा च देवीकालोत्तरे—

भूतानि चाहं स्थिरजङ्गमानि
यावन्ति चान्यान्यहमेव तानि ।
ईशोऽहमेवास्मि चराचरस्य
पिता च माता च पितामहोऽपि ॥ इति ॥

अथ प्रथमं शब्दोत्पत्तिक्रमो यथा—

ततस्त्वहर्मुखे काले शिवशक्त्या[क्त्योः] समागमात् ।
शिवेच्छा[च्छै] एव सर्वेषामुत्पत्त्यर्थमनन्तरम् ॥
तदभूत् क्षोभितं विश्वकारणं योगमायया ।
तत्क्षोभतः समुत्पन्नं शास्त्रं नादस्वरूपतः ॥
प्रवृत्तं तदधः किञ्चिद्विबुधाकारतः शिवम् ।
स बिन्दुरिति विख्यातः शरच्चन्द्रसमप्रभः ॥
स चतुर्धा समाख्यातो ज्योतिषां परमो निधिः ।
शिवेच्छाक्षोभितो बिन्दुस्तदधश्शक्तिरम्बिका ॥
शशाङ्कशकलाकारं शक्तित्रयमतस्ततः ।
वामा ज्येष्ठा स्थिता रौद्री सुप्तनागेन्द्रसन्निभा ॥
वामा वै दण्डवज्ज्येष्ठा रौद्री शृङ्गाभत स्थिता ।
सा माया पररूपेण जयाद्या परिकीर्त्यते ॥

जया च विजया चैव[म]अजिता च पराजिता ।
निवृत्तिश्च प्रतिष्ठा च विद्याशक्तिस्तथैव च ॥

इन्धिका दीपिका चैव रोचिका मोचिका परा ।
व्योमरूपा [परा]नन्दा नाथा नानाश्रिता तथा ॥

आविर्भावमिदं सर्वं शिवाद्यवनिगोचरम् ।
ताभ्यस्सर्वे समुत्पन्नास्त्रिंशद्वर्णाः सविंशकाः ॥

शिवस्यासं[स्यांस]स्थिता रौद्री वक्त्रे वामा प्रकीर्तिता ।
अम्बिका बाहुसंलग्ना ज्येष्ठा वै दण्डवत्स्थिता ॥

अकार एव विख्यात आकारं शृणुत द्विजाः ।
एष एव द्वितीयेन दण्डेनाग्रस्थितेन च ॥

शेषाणां लक्षणं नोक्तं मया विस्तरभीरुणा ।
वैखरी श्रोत्रविषया स्थूलवर्णपरिग्रहा ॥

स्थानेषु विधृते वायौ प्रयोक्तुरुपकारिणी ।
बुद्ध्या वर्णानुसन्धानपूर्वमर्थस्य वाचिका ॥

प्राणवृत्तिमतिक्रान्ता वागेषा मध्यमाह्वया ।
वर्णरूपानुसन्धानविरहान्तस्समुज्ज्वला ॥

लाघुराण्ड[मयूराण्ड]रसो यद्वन्निर्विशेषार्थधारिका ।
पश्यन्ती वागियं ज्ञेया तृतीया शिवशासने ॥

सूक्ष्मा चिदेकशरणा निवृत्ताशेषशक्तिका ।
वैखर्याः कारणं मध्या पश्यन्ती मध्यमां प्रति ॥

पश्यन्त्याः कारणं सूक्ष्मा निर्विकल्पस्वरूपिणी ।
एताश्च वृत्तयोऽसूनां चतस्रः प्रत्ययात्मिकाः ॥

अन्तरेव स्थितास्तिस्रो बहिरन्या व्यवस्थिता ।
रु[यां]गोपालाङ्गना बाला म्लेच्छाः प्राकृतभाषिणः ॥

अन्तर्बलगताः सर्वा नित्यं जल्पन्ति ता गिरः ।
आभ्यो न परमो बन्ध आभ्यो मुक्तिस्तु नापरा ॥

तन्निवृत्त्यविनाभूतदृक्क्रियावारको यतः ।
विविक्ता मन्वते [ते]भ्यः पुद्गलास्वन्नत्रचित् ? ॥
स्वरूपज्योतिरेवान्तः सूक्ष्मा वागनपायिनी ।
यस्यां दृष्टस्वरूपायामहंकारो निवर्तते ॥
भित्त्वायं बोधखड्गेन निर्गच्छत्यविशङ्कितः ।
केवलं परमानन्दो धीरो नित्योदितः प्रभुः ॥
नास्तमेति न चोदेति न श्रान्तो न विकारवान् । इति ।

अथ शक्तो विज्ञानकेवलेषु पक्वात्मतयानुगृहीततीव्रतरशक्तिनिपातान् परमुक्तान् कृत्वा तीव्रशक्तिनिपातान् परमुक्तिमप्रापय्य तेषु भोगाय शुद्धमाया-शक्त्यभिव्यक्तिं कृत्वा पूर्वोदितविज्ञानानन्दमयकोशेन बद्ध्वा तन्मध्ये विज्ञान-कलानां रुद्राणूनां तन्वादिकं स्वयमुल्लेखनात्मना सम्पाद्योदुत्ता[द्युक्ता]त्मकसदा-शिवमुखेन स्थूलतया करोति । अथैत[ष] सदाशिवरूपः यथा वातूले—

योगिनां च यतीनां च ज्ञानिनां मन्त्रिणां तथा ।
ध्यानपूजानिमित्ताय निष्कलः सकलो भवेत् ॥
सौवीर्यं नास्ति तद्देहे मांसास्थिरुधिरं न च ।
इन्द्रचापमिवाकाशे दर्पणे प्रतिबिम्बवत् ॥
तद्रूपं वै समासेन सादाख्यमिति कीर्तितम् ।
सादाख्यं पञ्चधा प्रोक्तं तेषां लक्षणमुच्यते ॥
पराशक्त्यादिशक्तिभ्यः सादाख्यानां समुद्भवः ।
प्रथमं शिवसादाख्यममूर्तं तु द्वितीयकम् ॥
तृतीयं मुक्तिसादाख्यं चतुर्थं पीठ[मीरितम्] ।
योनिलिङ्गप्रकारेण जगत्सृष्ट्यर्थकारणम् ॥
सदा संयोगभावत्वात् कर्मरूपमुदाहृतम् ।
एतच्छिवमयं लिङ्गं सर्वतत्त्वालयं स्मृतम ॥
लिङ्गे तु जायते तत्र जगत्स्थावरजङ्गमम् ।
तस्माल्लिङ्गं विशेषेण कर्मरूपमुदाहृतम् ॥

कर्मोदये तु सृष्टिः स्यात् कर्मान्ते संहृतिर्भवेत् ।
एतत्कर्मेशरूपं तु सृष्टिस्थितिलयावहम् ॥ इति ॥

किञ्च परमशिवेन स्वसमवेतचिच्छक्तिविशिष्टबिन्दूपादानक्[क]तयोत्पादितसंज्ञारूपशब्दात्मकमपरज्ञानात्मकं नादं सदाशिवदेवो बुद्ध्वा वेदागमषडङ्गमीमांसान्यायशास्त्रपुराणधर्मशास्त्रायुर्वेदगान्धर्वार्थशास्त्ररूपाष्टादशविद्याः प्रणीतवान् ।

तदुक्तं स्कान्दे—

अष्टादशानां विद्यानामेतासां भिन्नवर्त्मनाम् ।
आदिकर्ता शिवस्साक्षाच्छूलपाणिरिति श्रुतिः ॥

मृगेन्द्रे—

सृष्टिकाले महेशानः पुरुषार्थप्रसिद्धये ।
विधत्ते विमलं ज्ञानं पञ्चस्रोतोऽभिलक्षितम् ॥ इति ।

एवंभूतः सदाशिवः त्रिष्वध्वसु श्रेष्ठभूतशुद्धाध्वसृष्ट्यादिकं करोति । तद्यथा-शक्त्यनुगृहीतावशिष्टतीव्रतरशक्तिनिपातवतो विज्ञानकेवलाननुगृह्य ज्ञानक्रियाभिव्यक्तिमतः कृत्वा तत्तारतम्येन तेषां बोधबैन्दवोदितशुद्धविद्येश्वरसादाख्यतत्त्वेषु तनुकरणादिसृष्ट्यादिकं करोति । तदाह पौष्करे—

भोगाधिकारया शक्तिरभिव्यक्तेह दीक्षया ।
येषां तेषां तु भोगार्थं शिवेन परिकल्पितम् ॥

तत्त्वं सदाशिवं तत्त्वं शिवतत्त्वं च निर्मितम् ।
भोगतत्त्वे स्थितिर्येसाद्वस्तुतस्त्वनयोर्द्वयोः ॥

व्यक्ताधिकारशक्तीनां भोगार्थं तत्त्वमैश्वरम् ।
तत्त्वं विद्याह्वयं किन्तु पुंसां स्थूलाधि[दि]कारणम् । इति ।

एवं शुद्धाध्वकृत्यमुक्त्वा अनन्तेश्वरमुखेन क्रियमाणमशुद्धाध्वकृत्यं प्रतिपाद्यते ।

तदुक्तं मृगेन्द्रे—

शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः ।
बिन्दुं शक्त्या पुरा क्षोभ्य शुद्धाध्वानं शिवोऽसृजत् ॥

मायां विघेशमार्गेण तत्त्वाद्यं चासृजत् पुनः ।
वामादिशक्तिभिर्युक्ता शिवेच्छाविधिशोधि[चोदि]तः ॥
विद्याराजाधिराजेशो मायां विक्षोभ्य मन्त्रराट् । इति ।

एतदनन्तेश्वराभिधानकमहेश्वररूपं यथा वातूले—

कर्मेशस्य सहस्रांशान्महेशस्य समुद्भवः ।
महेशं सकलं विद्यात् सृष्टिस्थितिलयात्मकम् ॥
पञ्चविंशतिभेदेन तन्मूर्तं पञ्चविंशति ।
नानारूपधरो देवो नानाभेदसमन्वितः ॥
नानाचिह्नसमो भेदो नानालीलामनोहरः ।
स्थानयानसमासीनः नृत्तकश्च सुसौम्यकः ॥
अनेनोकारसंयुक्तो देवदेवो महेश्वरः ।
जटामकुटसंयुक्त एकवक्त्रस्त्रिनेत्रकः ॥
सर्वाभरणसंयुक्तः चैकपद्मासनस्थितः ।
वरदाभयहस्तश्च मृगीपरशुधारकः ॥
ईशरूपमिदं प्रोक्तं ॥ इति ॥

एतदनन्तेश्वरमुखेन क्रियमाणाशुद्धाध्वकृत्यमाह—

**सू—अन्यस्सन् व्याप्तितोऽनन्यः कर्ता कर्मानुसारतः ।**
**करोति संसृतिं पुंसामाज्ञया समवेतया ॥ २ ॥** इति ॥

कर्ता अन्यस्सन् व्याप्तितोऽनन्यः पुंसां कर्मानुसारतः समवेतया आज्ञया संसृतिं करोतीति योजना। **कर्ता अन्यस्सन् व्याप्तितोऽनन्य इति।** उपादानजडरूपमायायाः सच्चिदानन्दरूपानन्तेश्वरो विरुद्धधर्मतया भिन्नोऽपि कार्योन्मुखस्वसमवायचिच्छक्तिद्वारकमायाव्याप्त्यत्वं[प्त्या]भिन्नो भूत्वेत्यर्थः । **पुंसां कर्मानुसारत इति।** मायायाः स्त्रीत्वव्यवहारात् तद्विलासानुभवित्वाद्वा पञ्चकञ्चुकात्मकपुंस्तत्वसम्बन्धाद्वा पुरुषत्वव्यपदिष्टानां पशूनां धर्माधर्मात्मककर्मपरिपाकानुगुणेनेत्यर्थः । **समवेतया आज्ञयेति।** स्वस्मिन् समवायसम्बन्धेन वर्तमानज्ञानक्रियात्मकशक्तिकरणेन संसृतिं करोति । अभिन्ननिमित्तोपादानतया तनुकरणादिकं सृजतीत्यर्थः । कर्ता अन्यस्सन् व्याप्तितोऽनन्य इति पदेन

प्रपञ्चो ब्रह्मविवर्तः, निरुपादानकः, केवलं ब्रह्मोपादानकः, केवलं मायोपादानकः, ईश्वरनिमित्तमात्रकः, परमाणूपादानक इत्यादिव्यावृत्तिपुरस्सरं मायाविशिष्टेश्वरोपादानक इति बोद्धव्यः। कर्मानुसारत इति पदं वैषम्यनैर्घृण्यदोषव्यावर्तकम्। पुंसामिति बहुवचनादिनिर्देशः केन प्रमाणेन साध्य इत्याशङ्कापूर्वोत्तरवचनानि पौष्करे—

आत्मानो बहवः प्रोक्ता बहुत्वं केन गम्यते।
नाक्षगम्यं नानुमेयं नोपमाविषयं गतम्॥
भेदस्य मेयधर्मत्वान्माता मेयः कथं भवेत्।
साध्यसाधनभावोऽपि नात्मभेदोपपादकः॥
आत्मानो बहवो जन्ममरणादिविभेदतः।
जन्मनाशोदयाद्धर्मात् [शादयो धर्माः]दृश्यन्ते भिन्नवस्तुषु॥
ततस्तु जन्मनाशाद्याः ह्यात्मनो भेदकाःस्थिताः।
ननु देहस्य जन्माद्या देहाद्यैस्सहजात्मनाम्॥
देहादेर्यदि जन्मादि न चाचैतन्यदर्शनम्।
तद्देहे जातबालाना[मात्राणा]मपि चैतन्यमिष्यते॥
चैतन्येन विमुक्तस्सन् देहादिरुपजा[पू]यते।
जन्मादिभेदवन्तोऽतो देहाश्चिद्भेदसाधकाः॥ इति॥

ननु श्रुतावात्मैकत्वस्य प्रतिपादितत्वात् अत्र नानात्मकल्पनं विरुद्धमिति चेत्—सत्यम्। शिवजीवयोः सत्यज्ञानस्वरूपत्वादभेदः। भेदस्तु-[वृत्तिज्ञा] नादावेव। निजवृत्त[त्ति]भेदान्नानात्वात् जीवनानात्वमिति न वैदिकविरोधः। तदुक्तं कामिके—

ज्ञानं तु द्विविधं प्रोक्तं वृत्तिरूपं निजं तथा।
निर्विशेषं निजं शुद्धं नैवोपप्लवते ध्रुवम्॥
वृत्तेरमी विशेषाः स्युः संविदाद्याश्च सुव्रताः।
वैदिकं शैवमित्युक्तं शैवं वैदिकमेव च॥
वैदिकान्तर्गतं भूतं शैवं शैवात्तदप्यथ। इति।

अथ कर्मप्रमाणप्रतिपादकवचनानि पौष्करे—

अविशिष्टे तु भोक्तृत्वे भुञ्जते विद्धि[स्वर्हि]केचन ।
केचनावीचिमुख्येषु न स्यादेतदहेतुकम् ॥
यत्तत्र हेतुःकर्मेति मन्तव्यं मुनिपुङ्गवाः ।
उभयोः कृषिसाम्ये तु कश्चिद्धान्यानि यच्छति ॥
न किञ्चिदपरस्तस्य[च]कर्मकारण[कं] द्विजाः ॥ इति ॥

तस्य लक्षणवचनानि मृगेन्द्रे—

कर्मव्यापारजन्यत्वाददृष्टं सूक्ष्मभागतः ।
जनकं धारकं भोग्यमध्यात्मादित्रिसाधनम् ॥
तत्सत्यानृतयोनित्वाद्धर्माधर्मस्वरूपकम् ।
स्वापे विभागमध्येति तत्सृष्ट्यावुपर्युञ्जते[ष्टावुपयुज्यते] ॥
मायायां वर्तते चान्ते नाभुक्तं क्षीयतेऽपि च ।

पौष्करे—

कर्मेह त्रिविधं दृष्टादृष्टजन्मोपभोग्यकम् ।
तथा नियतकालोपभोग्यं चेति समासतः ॥
आयुर्योगो गलूच्यादिः सिद्धो मन्त्रप्रभावतः ।
तज्जन्मन्येव फलदो दृष्टभोग्यं तदुच्यते ॥
स्वाराज्यावीचिभोग्यादौ देहान्ते पुण्यपापयोः ।
अदृष्टवेदनीयं तत् कर्मोक्तं शिवदर्शने ॥
अश्वमेधो द्विजवधः कृतः कालेन भोगतः । इति ।

अथ मायाप्रमाणवचनानि पौष्करे—

नाभूच्छक्तिरुपादानं चिद्रूपत्वाद्यथा शिवः ।
परिणामो चितः प्रोक्तः चिद्रूपस्य न युज्यते ॥
चितो विवर्त एवोक्तस्तथात्वे कार्यशून्यता ।
सर्वप्रमाणसंसिद्धं चिद्विवर्तं कथं जगत् ॥
निश्शेषाश्शेषकार्याणां कारणत्वाद्विदन् यथा ।
यदि नित्यं यथा तन्तुः तस्याम्नाय[तथा माया]प्यनश्वरा ॥

अनित्यैषा यदि[दी]ष्येत कर्मणां कुत्र संस्थितिः ।
न बिन्दुः कर्मणां स्थानं बिन्दुः कर्मोत्तरो यतः ॥
न चात्मनि स्थितिस्तेषां यस्मादात्मा जडो भवेत् ।
तस्मात्तत्त्वात्मिका माया स्थिता विश्वस्य कारिणी ॥

अथ मायालक्षणवचनानि स्वायम्भुवे—

मायातत्त्वं जगद्बीजमविनाश्यव्ययात्मकम् ।
अविवेकाकुलं सूक्ष्ममनाद्यव्ययमीश्वरम् ॥

कामिके—

मायाशक्तिर्विभुर्नित्या देहिनां परिमोहिका ।
मोहस्तु विषयासक्तिः यदा संसृजते शुभाः ॥
माया तु द्विविधा ज्ञेया सूक्ष्मा स्थूला मुनीश्वराः ।
अव्यक्तता तु सूक्ष्मत्वात् व्यक्तता स्थूलरूपतः ॥
कारणं कार्यतः सूक्ष्मतरा व्यक्तेतरा यतः ।
अन्यथाभानहेतुत्वादियं मायेति कीर्तिता ॥
आत्मतत्त्वतिरोधानात् तम इत्युच्यते बुधैः ।
विद्यानाश्यत्वतोऽविद्या मोहस्तत्कारणत्वतः ॥
सद्वैलक्षण्यदृष्ट्येयमसदित्युदिता बुधैः ॥ इति ।

सृष्टिक्रमः—ईश्वरेण मायायां विक्षोभितायां यथा तीव्रवायुना ताडने तदविनाभूताः याः समुद्रात् [सञ्जाताः तरङ्गफेन] बुद्बुदशीकरादयस्तेन साकं वर्तन्ते तथा ईश्वरसमवेतकार्योद्युक्तचिच्छक्तियुक्तमायातः तदविनाभावतया व्यञ्जा[ञ्जि]ततनुकरणादिकं ताभ्यां सह वर्तते । अथ सदाशिवेच्छा-विनियुक्तविद्येश्वरीसमवेतचिच्छक्तियुक्तमायाविनाभूततयोत्पन्नतत्त्वादिक्रमो यथा कामिके—

माया चिद्योगमाया[दाय]येन केनाकुलीकृता ।
ततः कलां प्रसूयेत रागविद्ये कलापुनः ॥

पौष्करे—

[माया]तो द्विविधा सृष्टिः स्थूला सूक्ष्मात्मिकेत्यपि ।
दृक्छक्तिव्यञ्जिका सूक्ष्मा स्थिता तत्त्वात्मनात्मनि ॥

स्थूला भुवनरूपेण शरीराद्यात्मना स्थिता ।
सूक्ष्माः कलादयः पूर्वं स्थूला बध्नन्ति तास्ततः ॥

कला विद्या च रागश्च कालो नियतिरेव च ।
पञ्चैतानि [च] तत्त्वानि मा येयानि[योत्थानि]द्विजोत्तमाः ॥

ग्रहणाभावतस्तस्य ग्राहकः शून्यवत्स्थितः ।
तन्निवृत्त्यर्थमादौ तु मायातो जायते कला ॥

ततो विद्या कलातत्त्वादभूद्भोगार्थमात्मनः ।
कलातो जायते रागः सद्यः पुंसां प्रवृत्तये ॥

कलादिभिस्त्रिभिस्तत्त्वैः प्रवृत्तं पुरुषं तथा ।
लवत्रुट्यादिभिः कालः कलयत्यात्मवृत्तिभिः ॥

ताश्च भौवनदेहोर्ध्व[त्थ]मेवं यस्मात्क्रिया तथा ।
अतीतवर्तमानैष्यवृत्तीनां कारणं क्षयात् [क्रमात्] ॥

स काल इति मन्तव्यो भोग्यार्थोत्पादको नृणाम् ।
भोगायाभिप्रवृत्तस्य कलाविद्यादिवृत्तिभिः ॥

कर्मणामार्जितानां तु फलोपहरणे सति ।
तद्विनाशे प्रवृत्तेयं नियतिश्शिवशासने ॥

पञ्चकञ्चुकसंयुक्तः प्रकृतिं भोक्तुमुद्यतः ।
अविद्यादिसमायुक्तः पुरुषः परिकीर्तितः ॥

अथ मायां सूक्ष्मतयोत्पन्नप्रकृतिं श्रीकण्ठपरमेश्वरः कलात्मस्थूलात्मकत्वेनोत्पाद्य ततोऽशुद्धाध्वप्रपञ्चं सृष्टवान् । तथाह पौष्करे—

अथ प्रकृतितत्त्वं तु क्रमायातं निरूप्यते ।
तच्च मायोद्भवं यस्मात्कलातस्स्थूलतां गतम् ॥

गुणादिक्षितिपर्यन्ततत्त्वं जातं यतो भवेत् ।
तदव्यक्तमिति प्रोक्तं ततो [क्षुब्धं] श्रीकण्ठविक्रमैः ॥

अथ प्रकृतितत्त्वात्तु गुणतत्त्वं व्यजायत ।
तत्त्वादयस्समां[मं]ह्यस्मात्प्राप्तास्तत्त्वं गुणात्मकम् ॥

क्षोभकोऽत्र महातेजाः श्रीकण्ठोऽनन्तविक्रमः ।
प्रबुद्धः परमेशानः शक्तिसम्पर्कमात्रतः ॥
सत्वं रजस्तमश्चेति गुणाः प्रकृतिसम्भवाः ।

अथ ब्रह्मविष्णुरुद्रमुखेन गुणत्रयमधिष्ठायाशुद्धाध्वसृष्ट्यादिकृत्यं करोति। तद्यथा सूतसंहितायाम्—

ईक्षिता पूर्ववद्भूत्वा स्वशक्त्या परया युतः ।
मायाया गुणभेदेन रुद्रं विष्णुं पितामहम् ॥
सृष्ट्वानुप्राविशत्तेषामन्तर्यामितया हरः ।
तेषां रुद्रः पराभेदात् परतत्त्ववदेव तु ॥
करोति सर्गस्थित्यन्तं रुद्ररूपेण सत्तमाः ।
संहरत्यविशेषेण जगत्सर्वं चराचरम् ॥
विष्णुरप्यास्तिकाः साक्षात् पराभेदेन केवलम् ।
करोति सर्गस्थित्यन्तं विष्णुरूपेण सत्तमाः ॥
पालयत्यविशेषेण जगत्सर्वं चराचरम् ।
ब्रह्मापि मुनिशार्दूलाः पराभेदेन केवलम् ॥
करोति सर्गस्थित्यन्तं ब्रह्मरूपेण चास्तिकाः ।
करोति विविधं सर्वं जगत् पूर्वं यथा तथा ॥ इति ॥

अथ गुणतत्त्वात् बुद्ध्यादिपृथिव्यन्ततत्त्वानामुत्पत्तिक्रमो यथा पौष्करे--

गुणतत्त्वात्परा बुद्धिरभवन्मुनिपुङ्गवाः ।
रजस्तमोभ्यां न्यग्भूता वृत्तिः सत्वेन चोत्कटा ॥
सा बुद्धिरुदिता तन्त्रे विषयाध्यवसायिनी ।
अत ऊर्ध्वमहङ्कारतत्त्वं सङ्क्षिप्य वर्ण्यते ॥
प्रत्यात्मनियतं तच्च प्रसिद्धमहमात्मकम् ।
मनःपूर्वं तु यस्त[त]त्त्वं यत एवोपजायते ।
स च त्रिविध उद्दिष्टः प्रथमस्तत्र तैजसः ॥
वैकारिको द्वितीयस्स्यात् तथा भूतादिकः परः ।
सत्वेनोत्कृष्टभागो यः स तैजस इहोच्यते ।
वैकृतो रजसोत्कृष्टो भूतादिस्तमसा कृतः [धिकः] ॥

तैजसादप्यहङ्कारात् मनोबुद्धीन्द्रियाणि च ।
बुद्धीन्द्रियाणि कथ्यन्ते श्रोत्रं त्वक्चक्षुरेव च ॥
जिह्वा घ्राणं च पञ्चेति सुप्रसिद्धानि तानि च ।
प्रत्यक्षविषयत्वेन तेषां सिद्धेर्न युक्तयः ॥
कथ्यन्ते तान्यहङ्कारादुपजातानि सात्विकाः ।
पञ्च कर्मेन्द्रियाणि स्युरहङ्कारात्तु वैकृतात् ॥
कर्मेन्द्रियाणि वाक्पादपाणिगुह्यगुदानि च ।
अहङ्कारात्तु भूतादेः जाता तन्मात्रसंहतिः ॥
महाभूतानि जायन्ते क्रमात्तन्मात्रपञ्चकात् ।
आकाशं पवनस्तेजस्तोयं भूरिति संज्ञया ॥ इति ॥

एभ्यो महाभूतेभ्यो देहाद्युत्पत्तिक्रमो यथा मृगेन्द्रे—

देहेऽस्थिमांसकेशत्वङ्नखदन्तेषु चावनिः ।
मूत्ररक्तकफस्वेदशुक्लादौ वारि संस्थितम् ॥
क्षुतिपक्तौ स्मृतोपित्ते तेजस्तद्धर्मदर्शनात् ? ।
प्रयोक्तृत्यादिमहीप्रान्तमेतदण्वर्थसाधनम् ? ॥
प्रत्यात्मनियतं भोगभेदतो व्यवसीयते ।
सर्वतो युगपद्वृत्तेरनुत्पादादसर्वगम् ॥
भिन्नजातीयमप्येकफलं दीपाङ्गवस्तुवत् ॥ इति ॥

एवं प्रथमद्वितीयसूत्राभ्यां कर्तुः प्रमाणलक्षणे मायाकर्मप्रमाणलक्षणात्मबहुत्वप्रमाणाशुद्धाध्वोत्पत्तिक्रमाश्च प्रतिपादिता भवन्ति ॥

**॥ इति निगमागमपारावारपारीणसदाशिवशिवाचार्यविरचितायां सिद्धान्तसूत्रवृत्तौ जगदीश्वरप्रमाणलक्षणकृत्यनिरूपणं नाम प्रथमः पटलः ॥**

अथ द्वितीयसूत्रोक्तानां पुंसां प्रमाणलक्षणे तज्ज्ञानक्रियाप्रतिबन्धकाणवप्रमाणलक्षणे च तृतीयचतुर्थसूत्राभ्यामाह—

**सू—नेतितो ममतोद्रेकादक्षोपरतिबोधतः ।
स्वापे निर्भोगतो बोधे बोद्धृत्वादस्त्यणुस्तनौ ॥ ३ ॥**

**आत्मान्तःकरणादन्योऽप्यन्वितो मन्त्रिभूपवत् ।**
**अवस्थापञ्चकस्थोऽतो मलरुद्धस्वदृक्क्रियः ॥ ४ ॥** इति ॥

तनावणुरस्ति नेतितो ममतोद्रेकात् अक्षोपरतिबोधतः स्वापे निर्भोगतः बोधे बोद्धृत्वादिति योजना । आत्मान्तःकरणादन्योऽपि मन्त्रिभूपवदन्वितः यतो मलरुद्धस्वदृक्क्रियः अतोऽवस्थापञ्चकस्थ इति योजना ।

तनावणुरस्तीति । वर्तमानदेहे [प्रवर्तक] त्वेनातिसूक्ष्मतयाणुरिति व्यपदिष्टो नित्यव्यापकचिद्रूपवानात्मास्ति । आत्मनोऽप्रत्यक्षत्वादनुमानेन साधयितुं तनावित्युक्तम् । यथा पौष्करे—

प्रवर्तमानो देहादिश्चेतनाधिष्ठितः सदा ।
स्वतः प्रवृत्तिशून्यत्वात् जगत्तत्त्वे घटादिवत् ॥
यस्तु प्रवर्तकस्सोऽयमात्मेति परिपठ्यते ।

कामिके च —

नित्यज्ञानमयो ह्येष वृत्तिज्ञानं च शाश्वतम् ।
व्यापकोऽपि शरीरेऽस्मिन्वर्तते व्यापकः प्रभुः ॥ इति ॥

ननु पञ्चस्कन्धसमा[से]नैव प्रवृत्तिनिवृत्तिसम्भवात् नित्यज्ञानमयात्मकं चिन्नास्तीति केचित् वदन्ति । यथा कामिके-नास्तीत्येके प्रपेदिरे इति । तान् प्रत्यात्मास्तित्वे हेतुमाह—**नेतित इति** । रूपादिपञ्चस्कन्धं दृष्ट्वैतद्व्यतिरेकेणात्मेति कोऽपि नास्तीति वदन्नेवा[त्मनोऽ]स्तित्वं सिद्धम् । अथ आत्मा देहेऽस्तीति कथम् । तस्य देहाद्व्यतिरिक्तत्वे प्रमाणाभावेन देह एव आत्मेति लोकायता वदन्ति । यथाह कामिके —

तत्र केचिदमुं प्राहुः शरीराव्यतिरेकिणम् ।
यदा पवनभूवारितेजसां मेलनं भवेत् ॥
इच्छायत्नसमायुक्तं तदा जायेत चेतनम् ॥ इति ।

तान् प्रति तन्निराकरणे हेतुमाह—**ममतोद्रेकादिति** । ममतोद्रेकात् अहं देह इत्यस्मात् मम देह इत्यस्य प्रत्यक्षानुमानागमसंमतत्वेनाधिक्यात् देहमधिष्ठाय तत्प्रवर्तकत्वेनात्मा विद्यत इति निश्चीयते । अथेन्द्रियात्मवादिनस्तु आत्मनो ज्ञातृत्वलक्षणादिन्द्रियाणां ज्ञातृत्वादिन्द्रियाण्येवात्मेति वदन्ति ।

यथाह पौष्करे—चक्षुरादीन्द्रियं परं चेतनं मन्यमानाः तत्त्वसिद्धा मुनिषु केचन। इति। तन्निरासायाह—**अक्षोपरतिबोधत इति**। बाह्येन्द्रियोपरतस्वप्नावस्थायामपि विषयानुभवान्नेन्द्रियाण्यात्मा। अत आत्मैवेन्द्रियद्वारा शब्दादिविषयपञ्चकं जानाति। यथाह कामिके—

अहमेव च पश्यामि रसयामि [शृणोमि] च।
न ह्येतदिन्द्रियात्मत्वे कथञ्चिदुपपद्यते ॥ इति।

अथ निरीश्वरसाङ्ख्याः नात्मनः कर्तृत्वभोक्तृत्वे इति वदन्ति। यथाह कापिले—

मूलप्रकृतिरविकृतिःमहदाद्याः प्रकृतिविकृतयस्सप्त।
षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ इति।

तन्निरसनवचनं यथा मृगेन्द्रे—नाकर्तेति। कर्तृत्वे हेतुमाह—**स्वापे निभोगत इति**। आत्मनस्सुषुप्तौ प्रकृतिविकाराणां देहेन्द्रियाणां विषयानुभवाभावात् आत्मन एव कर्तृत्वभोक्तृत्वे सम्भवतः। अथ सुषुप्तिरेवात्मनाशः, प्रबोधे त्वात्मन उत्पत्तिः तस्मात् नित्यज्ञानमयः कश्चिदात्मा नास्तीति बौद्धैकदेशिनो वदन्ति यथाह कामिके:—

सुषुप्ते नेति चेन्मैवं सुषुप्त्यत्रा[प्ताव]पि विद्यते।
अन्यथानुपपत्त्याख्यकेन[1] मानेन मीयते।
तथा सुप्तोत्थितो ब्रूते सुखव्यापि [मस्वाप्स]मित्यहम् ॥ इति।

अथात्र योगिनो देहे वायौ सति प्रवृत्तिस्तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यां प्राणवायुरात्मेति वदन्ति। तन्न। सुषुप्तौ वायोरुच्छ्वासनिश्वासात्मनो वर्तनेऽपि विषयदर्शनाभावात् प्राणवायुरप्यात्मा न भवति। यथाह कामिके—

प्राणवायुर्न चैतन्यमित्यनेनैव भाषितम् ॥ इति।

अथ विषयसर्व[स्मरण]ग्रहणनिश्चयकृदन्तःकरणवर्ग एवात्मेति न्यायवैशेषिकबौद्धादयो वदन्ति। तदपि न। देहाद्बहिरन्तःकरणानां प्रवृत्त्यभावात्। स्मरणग्रहणनिश्चयानुसन्धानानां भिन्नक्रियात्वेन चातुर्विध्याच्च। तदुक्तं कामिके—

---

१. मातृका—अन्यथापि सुषिप्तिस्तु केन मानेऽनु मीयते।

न शरीराद्बहिस्तस्य प्रवृत्तिः क्वापि लभ्यते ।
अत एव मनो नात्मा न बुद्धिर्नाप्यहङ्कृतिः ॥
स्मरणात् प्रतिसन्धानम्................ ॥ इति ॥

एवं निराकरणादन्तःकरणवर्गो बाह्येन्द्रियवत् न[आत्मा] । किन्तु आत्मज्ञानक्रियाश्चाव्यक्तभूमित्वेनात्मान्वित इत्याह—**आत्मान्तःकरणादित्यादिना । आत्मेति** । गत्यर्था ज्ञानार्था इति न्यायेन अत सातत्यगमन इति धातोरयं निष्पन्न आत्मशब्दो नित्यज्ञानस्वरूपवान् । यथाह कामिके—

अत सातत्यगमने व्युत्पन्नो ज्ञस्वभावतः ।
[1]परमात्मन्यात्मशब्दो गतेर्ज्ञानार्थता यतः ॥ इति ॥

एवंभूत आत्मा। **अन्तःकरणादन्य इति** । अन्तःकरणं बाह्येन्द्रियचक्षुराद्यपेक्षया आत्मनस्सन्निकृष्टं मानसादि, तस्मादन्य इत्यर्थः । तथापि विषयभोगार्थमन्तःकरणवर्गसम्बन्ध्येवेत्याह—**मन्त्रिभूपवदिति** । राज्यैश्वर्यभोगार्थं मन्त्रिसहितमहीपतिरिव विषयभोगार्थमन्तःकरणवर्गसंयुक्तश्चक्षुरादिबाह्येन्द्रियद्वारा विषयानुभवी भवति । यथाह पौष्करे—

इन्द्रियापेक्षया शक्त्या तद्द्वारेणार्थवीक्षणम् ।
अन्तःकरणसापेक्षबाह्येन्द्रियचयेन तु ॥
अन्तःकरणसापेक्ष चिच्छक्तेर्ध्येयसङ्गतिः । इति ।

ननु नित्यव्यापकचिच्छक्तिमदात्मनो विषयदर्शनेऽन्तःकरणापेक्षा किमर्थेत्यत आह—**मलरुद्धस्वदृक्क्रिय इति** । आत्मा स्वज्ञानक्रियाशक्त्योराणवमलरुद्धत्वान्मन्त्रशक्तिनिरुद्धदाहकशक्तियुक्ताग्निवत् प्रतिहतज्ञानक्रियेच्छादिमान् केवलावस्थितसत्तामात्रेण वर्तते । यथाह पौष्करे—

क्रियतेऽग्निगता शक्तिर्मन्त्रशक्तितिरोहिता ।
नैव स्फोटकरी सद्यः प्रज्वलत्यपि पावके ॥
अतिरोहितभावोऽपि मलेनैव स्वशक्तिभिः ।
तिरोहितः स्वकार्येषु न चाणुस्सम्प्रवर्तते ॥ इति ।

---

१. मातृका—परमात्मक्कसतो ज्ञानार्थता यतः ।

केवलावस्थास्थितात्मलक्षणं यथा स्वायम्भुवे—

अचेतनो विभुर्नित्यो गुणहीनोऽक्रियः प्रभुः ।
व्याघातभोगशक्तिश्च बोध्यः शोध्यकलः पशुः ॥ इति ।

तस्मादात्मनः कलया केवलावस्थापसरणेऽन्तःकरणेन्द्रियसापेक्षविषयदर्शकत्वं युज्यत इत्युक्तं भवति । अथ मलरुद्धस्वदृक्क्रिय इत्युक्तत्वात् तत्सद्भावे प्रमाणहेतुवचनं पौष्करे—

आत्मा मलावृतः सर्वज्ञत्वे किञ्चिज्ज्ञता यतः ।
न किञ्चिज्ज्ञस्तु यस्तो(स्सोऽ)यं मलेनापि न संवृतः ॥
यथा शिवस्तथा चायं मलेनैव समावृतः । इति ।

तस्य लक्षणं यथा कामिके—

तदनादिमल(त्वे)[स्त्वे]कश्चित्रशक्ति(ग)[श]तावृतः ।
दृक्क्रियाश्छादकः पुंसो विशुद्धस्य स्वभावतः ॥
पशुत्वव्यवहारस्य निमित्तं त्रिविधाणुषु ।
यत्सम्भवा[वेऽ]हंमात्रेण न च मोक्षव्यवस्थितिः ॥
अपयाते मले ह्यस्मिन् सर्वत्रोदितदृक्क्रियः ।
निरातङ्कं (निरा)विनापायं शिवत्वमधिगच्छति ॥

मृगेन्द्रे—

पर्यायैर्बहुभिर्गीतं [न] दृष्टं पशुभिस्सदा ।
पशुत्वपशुनीहारमृत्युमूर्छामलाञ्जनैः ॥
अविद्यावृतिरुश्या[द्धा]नि पापमूलक्षयादिभिः ।
तदेवं सर्वभूतानामनादिनि(विद्ध)[बिडं] महत् ॥ ?
प्रत्यात्मस्थं [स्वका]लान्तावधिशक्तिसमूहवत् । ?

पौष्करे—

मलोऽपि सप्तधा ज्ञेयो मोहश्चापि मदस्तदा[था] ॥
रागोऽणुश्च विषादश्च तापश्शोषश्च सप्तमः ।
वैचित्र्यमपि सर्वेषां मलिनानां प्रकीर्तितम् ॥

अथेतरव्यावर्तकत्वेनात्मज्ञानक्रियाशक्तिनिरोधकस्या[स्त्वा]णवमल इत्याह तत्रैव—

चिच्छक्तेर्नित्यसिद्धायास्सम्भवेत्सा[द्धा]धकं कथम् ।
कर्मणापि न च ज्ञानबाधस्सम्भवति द्विजाः ॥
साध्यत्वात्कर्मणः पुंसः साधकत्वेन संस्थिते ।
किञ्च भोगैकहेतुस्तत्कथं भोगस्य बाधकम् ॥
यतो ज्ञानात्मको भोगो न हि तेन तदावृतिः ।
तस्मान्न कर्म चिच्छक्तेर्बाधकं संव्यवस्थितम् ॥

अथ माया हि कारणात्मनात्मज्ञानतिरोधायिका कार्यात्मना प्रकाशिकेति वदन्तं प्रति उत्तरमाह तत्रैव—

न च माया मलस्तस्माद्यतः कार्यप्रकाशिका ।
कार्यात्प्र[र्यप्र]काशकं यत्तु स्वात्मनाच्छादकं न तत् ॥
यथा प्रकाशकौ दृष्टौ वह्निदीपौ प्रभावपि ।
न दीपः कारणं वह्नेः क्वचिदप्यप्रकाशकः ॥
न च माया स्वरूपेण पुंसां कार्यकरी स्थिता ।
कार्यैरणूपकारित्वात्तदित्थं तन्न चात्मना ॥
मायापि बाधिका न स्यादित्युक्तं तन्निरूपणे ।
मल एवं समुद्दिष्टः पुंसां सर्वज्ञबाधकः ॥ इति ।

अथ मायाकार्यकलादियोगात् सकलावस्थायामात्मा कर्तृत्वभोक्तृत्वादिविशिष्टो भवति । यथाह कामिके—

तत्रात्मा पशुराख्यातश्चेतनो जीवसंज्ञकः ।
पुण्यपापात्मनः कर्ता कर्मणो विविधस्य च ॥
तत्फलस्यानुभोक्ता च प्रतिकूलं जिहासति ।
आदित्सत्यनुकूलार्थं द्वेष्टि हृष्यति रक्षति ॥
अहङ्कारादिदेहादौ प्रमाद्यति च शोचति ।
अभ्यसूयति साकूतो नितरामभिमन्यते ॥
तथैव प्रतिसन्धत्ते प्रणिश्वसिति चेक्षते ।
शृणोति लज्जतेऽश्नाति हसत्युन्मीलयत्यपि ॥

उद्वेजयति संस्तौति जीवत्यपि विमुच्यते ।
वक्ति जिघ्रति संधत्ते लीयतेऽपि च मन्यते ॥
भावैरनेकैस्सम्भिन्नो निगमानिव सञ्चरेत् ।
अवाच्योऽयमलक्ष्योऽयमवेद्योऽयमनादिमान् ॥
व्याप्यते व्यापकश्चापि गम्यते गमकोऽपि च ।
असहायः सहायः च साधकस्साध्यते स्वयम् ॥
स्वतन्त्रः परतन्त्रोऽपि साधने कर्मणां मुहुः ।
चिन्मात्रश्चेतयत्यन्यान् स्वयं चेतयते तथा ॥
अचिन्त्यमहिमाश्चर्यगुणराशिरलौकिकः ।
निर्वाणपदसाम्राज्ये मयैवैषोऽभिषिच्यते ॥
जनयत्यखिलं विश्वं प्रेर्यते जनकोऽपि च ।
बहुधा कथयन्त्येनं बहवः प्रतिपादकाः ॥ इति ।

यत एवाणवमायाकर्मभिः बद्धः सकलसंज्ञक आत्मा अतः पञ्चावस्थक इत्याह—**अवस्थापञ्चकस्थ इति ।** पशुरबुद्धाद्यवस्थापञ्चकं लभते इत्यर्थः । तथाह स्वच्छन्दपारमेश्वरे—

अबुद्धश्चैव बुद्धश्च बुध्यमानस्तथैव च ।
प्रबुद्धस्सुप्रबुद्धश्च पञ्चापि कथयामि ते ॥
अबुद्धं तु पुनर्देवि कथयामि समासतः ।
तत्त्वभूतात्मसंहारे कलाक्षित्यन्तगोचरे ॥
मायां सम्यङ्निशायां वै संहृत्य परमेश्वरि ।
निर्व्यापारो भवेत्तस्माद्याव[त्तस्यो]दयः पुनः ॥
सुखदुःखाद्यभावश्च आ[त्मा]त्मवर्गस्य कर्मिणः ।
मलनिद्राविमूढात्मा रुद्धचैतन्यदृक्क्रियः ॥
स तिष्ठत्यबुधस्तत्र यावदायात्यहर्मुखम् ।
अबुद्धस्तु समाख्यातो बुद्धं देवि निबोधय ॥
परिपाकगतः कर्म ई[परिपाकं गते कर्मणी]श्वरेच्छाकरोद्यतः ।
प्रकाशान्नयान्य [प्रकाशेन जगद्यद्व]दनुगृह्णाति भास्करः ॥

करणान्यनुगृह्णाति तद्वच्चेश्वर आत्मनाम् ।
कलोद्दलितचैतन्यो विद्यादर्शितगोचरः ॥ १

रागोऽस्य रञ्जकत्वेन विषयानन्दलक्षणः ।
कालो वै कलयत्येवं त्रुट्यादिप्रलयावधिः ॥

नियतिर्निश्चितं नित्यं योजयत्यशुभे शुभे ।
परमाणुस्सहस्रांशतदन्यूनं न चाधिकम् ॥

पुंभावत्वमनुप्राप्य तत्त्वे वै पुरुषाह्वये ।
परं प्रधानमित्युक्तं प्रप[ञ्चं नै]कसङ्कुलम् ॥

तत्पुरं पूरयेद्यस्मात् तस्माद्वै पुरुषः स्मृतः ।
ततः श्रीकण्ठभगवान् स्वशक्त्या कर्मतः पशुम् ॥

प्रधानपाशजालेन वेष्टयेदथ[वि]स्मृतः ।
ब[द्ध]त्रिगुणबध्ये[ध्यो] वै कारि....[का कार]काणि तु ॥

तन्मात्रेन्द्रियबद्धेन दृढभूतैश्च वेष्टितम् ।
बद्धस्संसरति ह्येवं मायाद्यवनिगोचरे ॥

संसारी प्रोच्यते यस्मात्संसारेभ्यः पुनःपुनः ।
शब्दादिविषया यस्य विद्यते विषये तदा ॥

विषयाः प्रधानमित्याहुर्नानाबोधै[र्भेदैः]स्समन्विताः ।
नानाकर्मविपाकैश्च भुङ्क्ते तद्भावभावितः ॥

एवं भुङ्क्ते न[स] वै यस्मात्तस्माद्भोक्ता स उच्यते ।
तस्मिन्नज्ञो वरारोहे क्षेत्रे वै कर्षको यथा ॥

मायाभिलाषकालोक्त्या[कालाख्यैः] कृष्यते मोहलाङ्गलैः ।
वपेद्द्विधर्मभावेन मनोवाक्कर्म[काय]कान्वितम् ॥

धर्माधर्ममयं बीजं प्रविकीर्य समन्ततः ।
तस्माद्वा अङ्कुरोत्पत्तिः सुखदुःखफलोदया ॥

वर्धते कामक्रोधेन संसिक्तो रागवारिणा ।
यस्मिन्देशे च काले च वयसा यादृशेन च ॥

यादृक् शुभाशुभं कर्म तादृशं लभते फलम् ।
भुङ्क्ते तु विविधाकारं पूर्वकर्मवशाद् बुधः ॥

यस्मादेवं विजानाति तस्मात् क्षेत्रज्ञ उच्यते ।
विषयो बुध्यते यस्माद् बुद्धः तस्मात्प्रकीर्तितः ॥

तदेवादिष्टरूपेण यदासौ विषयेषु च ।
बुध्यमानस्तु स यतमधुना[यथा ह्यधुना] कथयामि ते ॥

यदा जुगुप्सते लोकात् शुभांश्चैवाशुभांस्ततः ।
कृत्रिमानिव मन्येत परं वैराग्यमाश्रितः ॥

मायाद्यवनिपर्यन्तमिन्द्रजालं तु बुध्यतः ।
पुत्रमित्रकलत्रादिसुहृत्स्वजनबान्धवान् ॥

यदा जितं यदा द्रव्यं शुभेन त्वशुभेन वा ।
तत् क्षोभ्यन्ते तदा सर्वे निराशङ्का निराकुलाः ॥

वयमेकाकिनश्चैव यास्यामो यमसादनम् ।
तस्माद्वा न शुभा ह्येते वैरिणोऽनर्थकारिणः ॥

स्वात्मीयादप्ययं देहाद् नित्यमेव जुगुप्सते ।
शुक्लशोणितसम्भूते विषयाभोगभूषिते ॥

नानाव्याधिसमाकीर्णे जरामृत्युभयाकुले ।
शोकमोहमलाकीर्णे कथं वात्र वसाम्यहम् ॥

नित्यचिद्वि[भु]मुक्तस्तु चिन्त्यमानः पुनः पुनः ।
कथं मुक्तिर्भवेत्तस्मात् संसारात् दुरतिक्रमात ॥

एवं प्रबुध्यमानस्तु गुर्वाराधनतत्परः ।
बुध्यमानस्समाख्यातः प्रबुद्धं कथयामि ते ॥

गुरुप्रसादाद्देवेशि प्राप्तदीक्षः शिवाध्वरे ।
यदालोकयते देवि शिवज्ञानमहोदयम् ॥

करामलकवत्सर्वमध्यात्मा तत्स्वरूपतः ।
शिवाद्यवनिपर्यन्तमीक्षते ज्ञानचक्षुषा ॥

एवं कृत्वा समस्तस्तु उपाधेः परमं शिवम् ।
उन्मन्यन्तं वरारोहे सर्वाङ्गं विभुमव्ययम् ॥
एवं प्रबुद्धो देवेशि तल्लयस्तत्परायणः ।
सर्वारम्भविनिर्मुक्तः प्रबुद्धस्तूच्यते शिवे ॥
प्रबुद्धस्तु समाख्यातः सुप्रबुद्धं तु मे शृणु ।
दीक्षया ज्ञानयोगेन चर्यायोगेन सुव्रते ॥
यदा प्राप्तं परं स्थानमध्वातीतं निरामयम् ।
विरजं विमलं शान्तं प्रपञ्चातीतगोचरम् ॥
निष्कलं कारणातीतं सर्वज्ञं सर्वतोमुखम् ।
तृप्तं चानाद्यसम्बन्धं स्वतन्त्रं नित्यमेव हि ॥
छत्रसामर्थ्यविभवं सुप्रबुद्धं सनातनम् ।
तस्मिन्मुक्तस्तदात्मानं तद्गुणं च समन्वितः ॥
सुप्रबुद्धस्स वै प्रोक्तः । इति ।

अथ मर्त्यलोकवासी जाग्रत्स्वप्नसुषुप्तितुर्यतुर्यातीतावस्था[नाद]वस्थापञ्चकापन्नोऽपि भवति । एतदवस्थाः केवलसकलशुद्धभेदोऽत्र[भेदेन त्रि]पञ्चका भवन्ति । तद्यथा स्वायम्भुवे—

अथात्मा समलो बद्धः पुनर्मुक्तः च दीक्षया ।
विज्ञेयस्सत्रिधावस्थः केवलस्सकलोऽमलः ॥

एतदवस्थात्रयमपि सकलप्रलयाकलविज्ञानकलानां साधारणम् । तेषां लक्षणमाह—

जीवाश्च त्रिविधा ज्ञेयास्सकलाः प्रलयाकलाः ।
विज्ञानकेवलाश्चेति तेषां लक्षणमुच्यते ॥
मायाकर्ममलैर्युक्तः सकलस्तत उच्यते ।
मलकर्मयुतो विप्राः प्रलयाकल इष्यते ॥
मलेन रुद्धचैतन्यो न मुक्त इति कथ्यते ।
द्विधाप्ययं समाख्यातो विप्रा विज्ञानकेवलः ॥ इति ।

सकलश्च त्रिविध इत्याह—

सांसिद्धिको वैनयिकः प्राकृतश्च भवत्यणुः ।
विशिष्टधर्मसंस्कारसमुद्दीपितचेतसाम् ॥

गुणस्सांसिद्धिको भाति देहाभावेऽपि पूर्ववत् ।
लोकधीगुरुशास्त्रेभ्यो भाति वैनयिको गुणः ॥

संमार्जितो वैनयिको मनोवाक्तनुचेष्टया ।
प्राकृतो देहसंयोगे व्यक्तस्स्वप्नादिबोधवत् ॥ इति ।

त्रिविधपञ्चावस्थासु केवलसकलभेदावस्थादशकं पञ्चभूतपरिणामदेहिनामेव । तत्स्वरूपं यथा अचिन्त्ये—

मुख्यं जाग्रमिति ज्ञेयं स्वप्नं तु हृदयान्तकम् ।
हृदयान्तं समारभ्य नाभ्यन्तं तु सुषुप्तिकम् ॥

तस्माद्धस्तुरीयं तु तुर्यातीतं तु लिङ्गकम् ।
जाग्रादिस्थानमेवं हि प्रवर्तकमिहोच्यते ॥

श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं चैव तु पञ्चकम् ।
शब्दः स्पर्शो रसो रूपं गन्धश्चैव तु पञ्चकम् ॥

वचनादानगमनविसर्गानन्दपञ्चकम् ।
प्राणोऽपानस्तथाव्यानोदानौ समान एव च ॥

नागः कूर्मश्च कृकरो देवदत्तो धनञ्जयः ।
मनो बुद्धिरहङ्कारः चित्तं क्षेत्रज्ञ एव च ॥

पञ्चत्रिंशद्विवर्तन्ते जाग्रे तानि विनिर्दिशेत् ।
शब्दादिर्वचनादिश्च प्राणादिर्मन आदिकम् ॥

एते चरन्ति वै स्वप्ने मायारूपेण जाग्रति ।
क्षेत्रज्ञः चित्तप्राणैश्च सुषुप्तिश्चित्तवर्जितः ॥

तुर्ये तुर्यातीतके स्यात् क्षेत्रज्ञः सर्ववर्जितः ।

एते केवलभेदाः । एवं क्रमेण सम्प्रतिभा [संप्रसादमारभ्य] जाग्रत्पर्यन्तमारोहणविधानमवस्थापञ्चकं । शुद्धावस्थापञ्चकं तु नवमसूत्रे

वक्ष्यामः । एवमवस्थापञ्चकानुस्यूतो जीवात्मा देहवर्ती मूर्तिमान् इत्यर्थः । ननु तत्त्वानामाकल्पस्थायित्वादात्मनां नित्यव्यापकचिद्रूपत्वात् कथमवस्थापञ्चकत्व-मुपपद्यते इत्याशङ्क्योत्तरवचनम् । यथा अचिन्त्ये—

अयसोऽग्नेर्यथा योगो वियोगोऽग्नेर्यथाऽयसा ।
तत्त्वानामात्मनश्चैव शक्त्या[सक्तिः] कर्मवशा भवेत् ॥ इति ।

अथात्मलक्षणपरामर्शनानन्तरं निश्चितवचनं मृगेन्द्रे—

नाव्यापको न क्षणिको नैको नापि जडात्मकः ।
नाकर्ता भिन्नचिद्योगी पाशान्ते जी[शि]वताश्रुतेः ॥ इति ।

**॥ निगमागमपारावारपारीण सदाशिवशिवाचार्यविरचि-तायां सिद्धान्तसूत्रवृत्तौ पशुपशुत्व प्रमाण-लक्षणनिरूपणं नाम द्वितीयः पटलः॥**

अथ परमेश्वरः स्वसमवेतज्ञानक्रियाशक्तिद्वारा जीवात्मना तन्वादिक-मनुप्रविश्य भोगदायकत्वेन पालनतिरोधाने करोतीति पञ्चमसूत्रेणाह—

**सू.–विन्दन्त्यक्षाणि पुंसार्थान्न स्वयं सोऽपि शम्भुना ।**
**तद्विकारी शिवश्चेन्न कान्तोऽयोवत् स तं नयेत् ॥ ५ ॥ इति ॥**

अक्षाणि अर्थान् स्वयं न विन्दन्ति । किंतु पुंसा । तद्वत् सोऽपि शम्भुना। तच्छिवो विकारी चेत्[न]कान्तोऽयोवत् स तन्नयेत् इति योजना । अक्षाणि अर्थान् स्वयं न विन्दन्ति, किं तु पुंसेति । श्रोत्रादीन्द्रियाणि शब्दा-दिविषयान् स्वयं न जानन्ति । किं त्वात्मना प्रेरकेण जानन्ति । तद्वत सोऽपि शम्भुना इति यथा आत्मना प्रेरकेण अक्षाणि अर्थान् वेत्ति[विदन्ति]तथा पुमानपि शिवः[वेन]प्रेरकेणार्थान् वेत्ति न स्वयम् । अयमभिप्रायः—शिवसम-वेतचिच्छक्तिप्रकाशेनेत्यर्थः । यथाह पौष्करे—

अज्ञो जन्तुरनीशोऽयमपरायत्तचिद्वपुः ।
सोऽपि सापेक्ष एव स्यात् स्वप्रवृत्तौ घटादिवत् ॥
इष्यते स कथं कर्ता कर्ता तस्मान्महेश्वरः ।

पराख्ये—

पशुत्वं रुद्धचिच्छक्तेः स्वातन्त्र्यं न पशोरतः ।
कर्म चिद्रहितं तस्माद्योजकं तदपेक्षते ॥

योजकः स महेशान स्वेच्छया बलवान् यतः । इति ।

अथ योजनप्रकारो यथा पौष्करे—

मलान् सर्वात्मना हित्वा चैतन्यप्रसरात्मनः ।
कलाभिर्युज्यते तत्तु तस्यैव हि तिरस्कृतम् ॥
सर्वात्मना कला नैतच्चैतन्यं व्यञ्जयत्यणोः ।
किं तु कर्मानुसारेण कला प्रत्येकदेशतः ॥
ततश्चायं कलाबन्धः पुंसां प्राथमिकस्स्थितः ।
यतः [कलां] विना तेषां रूपं तन्न तु सिध्यति ॥
ततस्तच्छून्यकल्पं स्याच्चैतन्यप्रसरं विना ।
ग्राहकत्वेन तत्सिद्धौ न च तद्ग्रहणं विना ॥
ग्रहणाभावतस्तस्य ग्राहकश्शून्यवत्स्थितः ।
कलया कर्तृभूतस्य बुद्धिलक्षणकर्मणः ॥
आलोकवद्यत्करणं सा विद्या शिव शासने ।
सिद्धिर्हि कर्मग्राह्यत्वादात्मनो घटकुड्यवत् ॥
ग्राह्यं करणसापेक्षं दृष्टं रूपादिकं यथा ।
ततस्तु चक्षुराद्यैश्च क्रमेणार्थे विनिश्चिते ॥
बुध्यन्ते निश्चितार्थैस्तां पुमान् संवेत्ति विद्यया ।
प्रवृत्तस्य प्रसक्त्यर्थमपि रागः प्रवर्तते ॥
भोगाभावादशक्तस्य भुञ्जानस्य मलीमसान् ।
भोगा न तृप्तेस्तस्यातः कर्तुरेवोपकारिता ॥
कालः प्रवर्त[वृत्त]ये वाणुं कलयत्यात्मवृत्तिभिः ।
नियतिश्च तथा कर्म फले नियमयत्यणुम् ।
तस्मान्नियतिकालौ च स्थितौ कर्त्रुपकारकौ ॥
पञ्चकञ्चुकिसंयुक्तः प्रकृतिं भोक्तुमुद्यतः ।
अविद्यादिसमायुक्तः पुरुषः परिकीर्तितः ॥ इति ।

अथ भोगसमुच्चयवचनानि यथा पराख्ये—

कण्ठोद्गलितचैतन्यो विद्यादर्शितगोचरः ।
रागेण रञ्जितश्चापि बुद्ध्यादिकरणैर्युतः ॥

मायाद्यवनिपर्यन्ते तत्त्वभूतात्मवर्त्मनि ।
भुङ्क्ते तत्र स्थितान् भोगान् भोगैकरसिकः पुमान् ॥ इति ।

एवं पालनं—

स्वसंवेदनसंवेद्यं विधानमतिरोधनम् ? ।

अथानेकजीवानां बहुधा प्रेरकत्वेन शिवस्य विकारित्वमाशङ्क्य परिहरति—**तद्विकारी शिवश्चेन्न कान्तोऽयोवत् स तं नयेत् इति । तदिति** — वेदनपालनतिरोधानत्वहेतुना शिवो विकारवान् स्यादिति चेत् विकारवान्न भवति । किं तु यथा कान्तो निर्विकारस्सन् अयो विकारयति तथा शिवस्त्वविकारी सन् वृत्तिज्ञानस्वरूपं जीवात्मानं विकारयतीत्यर्थः ।

**॥ इति निगमागमपारावारपारीणसदाशिव शिवाचार्यविरचितायां सिद्धान्तवृत्तौ पशुपालनप्रतिपादनं नाम तृतीयः पटलः ॥**

एवं दर्शयितुं शिवलक्षणं षष्ठसप्तमसूत्राभ्यामाह—

**सू—अदृश्यं चेदसद्भावो दृश्यं चेज्जडिमा भवेत् ।**
**शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपं विदुर्बुधाः ॥ ६ ॥**
**नाचिच्चित्सन्निधौ किं तु न वित्तस्ते उभे मिथः ।**
**प्रपञ्चशिवयोर्वेत्ता यस्स आत्मा तयोः पृथक् ॥७॥ इति ।**

शम्भो रूपमदृश्यं चेदसद्भावः, दृश्यं चेत् जडिमा भवेत् । तद्व्यतिरेकेण ज्ञेयं बुधाः विदुः । चित्सन्निधौ अचिन्न । ते उभे मिथः न वित्तः, किं तु प्रपञ्चशिवयोर्वेत्ता यस्स तयोः पृथक् आत्मेति योजना । **शम्भो रूपमदृश्यं चेदसद्भाव इति** । शं सुखं भवत्यस्मादिति व्युत्पत्त्या शम्भुः । तस्य रूपं स्थूलसूक्ष्मरूपव्यतिरिक्तं चिदेकरूपम् । यथाह कालोत्तरे—

न स्थूलसूक्ष्मो न च शून्यरूपो ज्ञानैकरूपो जगदेकबन्धुः । इति ।

एवंभूतशिवस्य रूपं येन केन वर्त्मनाप्यदृश्यं चेत् गगनारविन्दवत् शून्यत्वेनासद्भावः स्यात् । तस्मादात्मनः शिवात्प्रयोजनमेव नास्ति । **दृश्यं चेत् जडिमा भवेदिति** । स्थूलरूपत्वेन चक्षुरिन्द्रियगोचरम् । सूक्ष्मरूपत्वेन परमाणुवद्योगिप्रत्यक्षो भवेच्चेत् घटपटादिवज्जडत्वं, अनित्यत्वादसत्वं च स्यात् । एवं दृश्यत्वादृश्यत्वासम्भवेन कीदृग्भूतं शिवस्वरूपमिति चेत्—**तद्व्यतिरेकेणेति** ।

इन्द्रियगोचरत्वात्यन्तागोचरत्वविरहेण ज्ञेयम् अनन्यानुभवैकवेद्यम्। तथा वीरे—

आद्यन्तशून्यममलं परिपूर्णमेकं
सूक्ष्मं परात्परमनामयमप्रमेयम्।
भावैकगम्यमजडं शिवतत्त्वमाहुः, इति

निश्वासे देवीदेवसंवादे—

सकले दृश्यमाने तु भावो युक्तो हि देहिनः।
निष्कले दर्शनं नास्त्यदृश्ये भावना कुतः॥

ईश्वरः—

सुशाश्वतं सुनिर्वाणमादिकारणवर्जितम्।
निर्मुक्तस्वा(न्त)सङ्कल्पं सकलाकलवर्जितम्॥
अभावं भावभावेन भावयेद्भाववर्जितम्।
बुद्ध्यहङ्कारनिर्मुक्तं योगायोगविवर्जितम्॥
तेन देवि समाख्यातस्सत्वादिकरणोज्झितम्।
प्रधानगुणनिर्मुक्तं हेतुकालविवर्जितम्॥
देहादेहविनिर्मुक्तं योगायोगविवर्जितम।
तेन देवि समाख्यातो महाभावः परश्शिवः॥ इति।

एवमनन्यानुभवैकवेद्यमिति बुधाः विदुः। जीवन्मुक्ता महात्मानोऽवदन्नित्यर्थः। एवं विना शिवेन जीवेन वा पृथक्तया यद्दृष्टं तन्नष्टम्। तस्मात्तस्यासत्त्वमचित्वं च भवेदित्युक्तं भवेत्।

ननु एवं चेत् जीवात्मा शिवस्यापि दृश्यो वा अदृश्यो वा? अदृश्यं चेत् शिवस्य सर्वज्ञत्वसर्वव्यापकत्वादिकं न स्यात्। दृश्यं चेत् जीवात्मनोऽपि जडत्वमसत्वं च स्यात् इति चेदुच्यते—शिवो जीवं स्वान्यत्वेन पश्यति चेत् तथात्वम्। क्वापि तथा न पश्यति। किं तु स्वस्वरूपानन्यत्वेन पश्यति। तस्मान्न विरोधः। जीवशिवयोरन्योन्यमविनाभावेन न दृश्यत्वम्।

प्रपञ्चशिवयोः कथमित्याशङ्कायां उत्तरमाह—**नाचिच्चित्सन्निधावित्यादिना**। **चित्सन्निधावचिन्नेति**। सदसच्चिदचिदिति पर्यायाः। सच्चिद्रूपशिवसन्निधौ अचिद्रूपप्रपञ्चो न स्पृशति [स्फुरति] तस्मात्ते उभे मिथो न वित्त इति।

शिवसन्निधौ प्रपञ्चस्यास्फुरितत्वात् प्रपञ्चस्य जडत्वाच्च प्रपञ्चशिवावन्योन्यं न जानीतः। तथात्वे सृष्ट्यादिकृत्यं शिवस्य न सङ्गच्छत इति चेत् उच्यते— ऐन्द्रजालिको यथा स्वशक्त्या जनेभ्यः समुद्रनगरादिनानाकारप्रदर्शयिता च स्वयं तथा न पश्यति। तद्वत्स्वपरिग्रहमायाशक्त्या जीवेभ्यस्तनुकरणभुवनादि-नानाकारप्रपञ्चप्रदर्शकोऽपि शिवस्य सन्निधौ प्रपञ्चस्य तदाकारेणास्फुरितत्वात् स्वयं तथा न पश्यति। तस्मात् सृष्ट्यादिकृत्यानि प्रपञ्चमपश्यतोऽपि शिवस्य सङ्घटते। तर्हि प्रपञ्चद्रष्टा को वेत्याशङ्कायामन्य एवेत्याह—किंत्विति। प्रपञ्चशिवयोर्वेत्ता यस्स तयोः पृथगात्मेति। सकलावस्थायां वृत्तिज्ञानेन पृथक्-तया प्रपञ्चं दृष्ट्वा निर्मलावस्थां स्वरूपज्ञानेनानन्यतया शिवानुभविता च तदुभय-विलक्षणलक्षितो जीवात्मेत्यर्थः।

उभयविलक्षणत्वं नामाप्रतिहतज्ञानस्वरूपस्य शिवस्य जडरूपप्रपञ्चस्य [च रूपात्] भिन्नलक्षणाणवमलशक्तिप्रतिहतज्ञानस्वरूपत्वम्। अनेन वृत्तिज्ञान-रहितस्य शिवस्य मायाशक्तिविलासकल्पितप्रपञ्चदर्शनं न सम्भवति। तस्मात्स-त्यासत्यवस्तुदर्शकत्वं जीवात्मन एवेति चोक्तं भवति।

**॥ इति निगमागमपारावारपारीणसदाशिवशिवाचार्यविरचितायां सिद्धान्तसूत्रवृत्तौ सदसद्विवेकनिरूपणं नाम चतुर्थः पटलः॥**

